उपशास्त्री-I साहित्य - तृतीय - पत्रम्
किरातार्जुनीय-महाकाव्यम् Saathi
Date __/__/____ प्रथमः सर्गः

प्र० (4)- पद्य मिदम व्याख्येयम् ।

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ॥

उत्तरम्-प्रसंगः- पद्य इयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात उद्धृतोऽस्ति ।

अस्मिन् श्लोके वनेचरः युधिष्ठिरं प्रति कथयति- तस्मात्त्वद्विषये कपटं कर्तुं सन्नद्धे दुर्योधने त्वं मत्कृतं वाग्व्यसि तच्छीघ्रमेव विधीयताम् । परोक्तवचनसंग्राहकाणां मत्सदृशानां वनेचराणां वाक्यानि तु केवलं समाचारज्ञापकान्येव भवन्ति ।

व्याख्या- तत् = तस्मात्, त्वयि = तव, जिह्मं = कपटं, कर्तुमुद्यते = त्वां जिघांसावित्यर्थः । तत्र = तस्मिन्दुर्योधने, विधेयं = कर्तव्यम् । उत्तरं = प्रतिक्रिया । आशु विधीयतां = क्रियताम् । ननु कर्तव्यमपि त्वयैवोच्यतामिति चेत्तत्राह - परेति । (परैः प्रणीतानि, तानि) परप्रणीतानि = परोक्तानि वचांसि । चिन्वतां = गवेषयतां (अहमिव दृश्यमानाः मादृशाः तेषां) मादृशाम् = वार्तामात्रसाराः खलु । वार्ता प्रवृत्तिर्वृत्तान्तः इत्यमरः । वार्तामात्रवादिनो वयम्, न तु कर्तव्यार्थोपदेशसमर्थाः । अतस्त्वयैव निर्धार्य कार्यमिति भावः । सामान्येन विशेषसमर्थनादर्थान्तरन्यासः ।

Renu Devi
28/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

Page No.

उपशास्त्री-II साहित्य - तृतीय-पत्रम्
किरातार्जुनीय-महाकाव्यम्-प्रथमः-सर्गः

Date ___/___/___

(1) प्र० - पद्यमिदम् व्याख्येयम् ।

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥

उत्तरम् - प्रसङ्गः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - युधिष्ठिरमुखेन शत्रोर्दुर्योधनस्य सर्वतोमुखी समृद्धिमाकर्ण्य स्वस्मिंश्च तत्कृतानपकारान् स्मरन्ती क्षुब्धहृदया द्रौपदी एवंभूतां तीक्ष्णतरां वाचं व्याजहार यया तस्य राज्ञो क्रोधोद्दीपनं भवेत् स च तमुन्मूलयितुं प्रयतेत

व्याख्या - अथ = (युधिष्ठिर के) कहने के बाद। द्रुपदात्मजा = द्रौपदी। द्विषतां = शत्रुओं की। सिद्धिं = (राज्य में) सफलता को। ततः = युधिष्ठिर (के मुख) से। निशम्य = सुनकर। ततस्त्याः = उनसे (कौरवों से) किये गये। अपाकृतीः = अपकारों को। विनियन्तुं = दूर करने में। (अथवा रोकने में) अक्षमा (सती) = असमर्थ हुई। नृपस्य = राजा (युधिष्ठिर) के। मन्युव्यवसायदीपिनीः = क्रोध और उद्योग को बढ़ाने वाली। गिरः = वचनों को। व्याजहार कहने लगी।

Renu Devi
29/08/20

राजा उमाकान्त संस्कृत महाविद्यालय
(पूर्णियाँ) सुखसेना ।

Page No. ____

शास्त्री-I साहित्य
अभिज्ञानशाकुन्तलम्
तृतीयोऽङ्कः

Saathi

Date __/__/__

प्र०(1) पद्य मिदम् व्याख्येयम्।
जाने तपसो वीर्यं बाला परवतीति मे विदितम्।
अलमस्मि ततो हृदयं तथापि नेदं निवर्तयितुम्॥

उत्तरम् - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितस्य अभिज्ञानशाकुन्तलम् नाट्य काव्यस्य तृतीयोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके अनुयात्रिकैः सह विदूषकं स्वराजधान्यां संप्रेष्य मुनिजनकार्यं च सम्पाद्य तं विश्रामार्थमारामे रहसि स्थितो राजा दुष्यन्तः सोत्कण्ठं शकुन्तलामेवानुध्यायन् तद्विषये विमृशति — अहं = दुष्यन्तः तपसः = तपश्चरणस्य वीर्यं = प्रभावं जाने = बलाद् यदि शकुन्तलां हरामि तदा नूनं कण्वशापापहतो भवेयमिति वेद्मि सा = अनुभूतकटाक्षमन्दस्मिता मय्यनुरागिणी बाला = षोडशवर्षिकी शकुन्तला परवती पराधीना गुरुजनपरतन्त्रा। इति = एवं मे = मम, विदितम् = ज्ञातम्। स्वयं मय्यनुरक्ताऽपि सा महर्षिशापभयेन बलादपि हर्तुं न शक्यते, अप्रगल्भत्वाद् गुरुजनपरतन्त्रत्वाच्च सा स्वयमागमिष्यतीत्यपि न सम्भवति। एवं चेत्तर्हि तत्कथैव त्याज्येत्याह - अलमिति। तथापि = तदपि इद हृदयं = स्वकीयं मनः ततः = शकुन्तलातो निवर्तयितुं = अपसारयितुं परावर्तयितुं दूरी कर्तुं न अलं = समर्थः अस्मि = न शक्नोमि।

यदि प्रभुशक्तिसम्पन्नोऽहं शकुन्तलां बलादपहरामि तर्हि निग्रहानुग्रहसमर्थः तपस्विनः कदाचिन् मां शापेन दहेयुः। मय्यनुरागिणी अपि सा शकुन्तला गुरुजनपराधीनत्वान्न स्वयं मामुपस्थातुं शक्नोति। अत्राप्रस्तुतप्रशंसा-विशेषोक्तिः अतिशयोक्तिश्चालंकाराः वृत्तं चार्या।

Renu Devi
28/08/20

राधा उमाकान्त सं० महावि० सुरसेना, पूर्णिया!

शास्त्री- II साहित्य

रत्नावली - नाटिका

देवि त्वन्मुखपङ्कजेन शशिनः शोभातिरस्कारिणा
पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम् ।
श्रुत्वा त्वत्परिवारवारवनितागीतानि भृङ्गाङ्गना
लीयन्ते मुकुलान्तरेषु शनकैः सञ्जातलज्जा इव ॥

उत्तरम्- प्रसंगः- पद्य इयं महाकवि श्रीहर्षवर्धन प्रणीतस्य रत्नावली नाटिकायाः प्रथम अंकात् उद्धृतोऽस्ति ।

व्याख्या - देवि प्रिये । पश्य = अवलोकय । शशिनः = चन्द्रस्य । शोभातिरस्कारिणा-शोभाम् = कान्तिम् = कान्तिम्, तिरस्करोति = अभिभावयति तेन । त्वन्मुखपङ्कजेन - तव = भवत्याः, मुखम् = आननम् एव पङ्कजम् = कमलम् तेन । विनिर्जितानि = पराजितानि अब्जानि = वारिजानि । सहसा = झटिति । विच्छायताम् = कान्तिहीनताम् । गच्छन्ति = प्रयान्ति । ते = तव । परिवारवारवनितागीतानि = परिवाराः = परिजनाः वारवनिताः = वाराङ्गनाश्च, तासां गीतानि = गेयानि श्रुत्वा = आकर्ण्य । भृङ्गाङ्गनाः = भ्रमर्यः । सञ्जातलज्जाः सञ्जाता = उत्पन्ना लज्जा = व्रीडा (आत्मगीतहीनतया लज्जिताः) यासु ताः । इव भूत्वा, शनकैः = शनैः शनैः । मुकुलान्तरेषु = कलिकान्तरेषु । लीयन्ते - निलीनाः भवन्ति । अत्र प्रतीपहेत्वलंकारोत्प्रेक्षाणामङ्गाङ्गिभावेन संकरः । शार्दूलविक्रीडितं वृत्तम् ।

Renu Devi
28/08/20

राध्या उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।